# महाकवि कालिदासः

महाकविः कालिदासः विश्ववाङ्मये सर्वोत्कृष्टः कविः विद्यते। तस्य जीवनविषये लिखितप्रमाणाभावेन निश्चित-रूपेण किमपि कथितुमशक्यः। तस्य जीवनवृत्तविषये अनेकलोकविश्रुतयः वर्तन्ते। केचिद् एनं विक्रमादित्यस्य सभायां कविः मन्यन्ते। केचित् तु गुप्तकालीननरेशाणाम् आश्रितः कथयन्ति। तस्य जन्मस्थानविषये पर्याप्तं मतवैभिन्यं दृश्यते। कोऽपि एनं ~~कशि~~ कश्मीरनिवासी, कोऽपि बङ्गवासी, कोऽपि विदिशावासी, कोऽपि उज्जयिन्यामस्य निवासः आसीदिति मन्यन्ते। तस्य विद्वत्वं सर्वेषु क्षेत्रेषु वर्तते।

कालिदासस्य कालनिर्धारणमतीव विवादास्पदः विषयः अस्ति। कालिदासस्य स्थितिकालसम्बन्धीनि यानि विभिन्नानि मतानि सन्ति तेषु मतद्वयमेव प्राधान्यं भजते। तयोः एकं गुप्तकालीनमतमस्ति यदनुसारेण गुप्तवंशस्य कस्यचनः राज्ञः मुख्यतः द्वितीयचन्द्रगुप्तस्य काले कालिदासः प्रादुरभवत्। अपरश्च ईसापूर्वप्रथम-शताब्द्यां परम्परया प्रसिद्धस्य उज्जयिनिनरेशस्य विक्रमादित्यस्य काले तस्य स्थितिं मन्यते। ~~अनयोः मतयोः~~

कालिदासेन रघुवंशं कुमारसम्भवं द्वे महाकाव्ये, मेघदूतम्, ऋतुसंहारश्च द्वे गीतिकाव्ये, अभिज्ञानशकुन्तलं विक्रमोर्वशीयं मालविकाग्निमित्रञ्च त्रीणि ~~नाट~~ नाटकानि लिखितानि। ऋतुसंहारं कालिदासस्य आदिकृतिः वर्तते।

Date
Page

अस्मिन् काव्ये षण्णामृतूनां वर्णनमस्ति। चतुश्चत्वारिंश-
-दधिकैकशतं श्लोकाः अस्मिन् विद्यन्ते। मेघदूतं
इति खण्डकाव्ये प्रियावियुक्तस्य सन्देशं विद्यते।
कुबेरशापाद् रामगिर्याश्रमे निवसन् यक्षः मेघेन
स्वप्रियायै सन्देशं सम्प्रेषयति। ग्रन्थेऽस्मिन् भागद्वयं
वर्तते। पूर्वमेघः उत्तरमेघश्च। पूर्वमेघे यक्षः गन्तुं
मेघाय मार्गं निर्दिशति, उत्तरमेघे प्रेषितं सन्देशं
कथयति। कुमारसम्भव महाकाव्ये सप्तदशसर्गाः
विद्यन्ते। अस्मिन् काव्ये कार्तिकेयस्य जन्मकथा अस्ति।
रघुवंशं महाकवेः सर्वोत्कृष्टं महाकाव्यमस्ति।
अत्र उनविंशतिसर्गाः विद्यन्ते। अस्मिन् महाकाव्ये
महाराजदिलीपादारभ्य रघुवंशीयानां राज्ञां कथा
वर्तते। रघुवंशमहाकाव्यं महत्प्रसिद्धं संस्कृतकाव्य-
-रत्नम् अस्तीति विपश्चितां मतम्। मालविकाग्निमित्रं
कलात्मकविकासदृष्ट्या कालिदासप्रणीतं नाटकं वर्तते।
लघुकाये पञ्चाङ्कयुक्ते नाटकेऽस्मिन् विदिशानरेशस्य
अग्निमित्राख्यस्य राज्ञः मालविकया सह प्रणयसम्बन्धस्य
कथा अस्ति। विक्रमोर्वशीये नाटके पृथ्विपालस्य
पुरुरवसः उर्वश्या सह प्रणयकथा वर्तते।
अभिज्ञानशाकुन्तलं विश्ववाङ्मयस्य अत्युत्कृष्टं
नाटकं वर्तते। ~~अभिज्ञानशाकु~~ सप्ताङ्कयुक्ते नाटके
अस्मिन् दुष्यन्तस्य शकुन्तलया सह प्रणयकथा
वर्णिता अस्ति। शकुन्तलस्य रमणीयत्वं सर्वोत्कृष्ट-
-त्वञ्च परां कोटिम् अभजत्। पाश्चात्यविद्वांसोऽपि
मुक्तकण्ठेन शकुन्तलं प्रशंसन्ति।

classmate
Date
Page

5026 (HC)

Essay :

## विद्यार्थी जीवनम्

ये विद्यानां अर्थिनः सन्ति त एव विद्यार्थिनः कथ्यन्ते। येषां मनसि सर्वदा विद्याप्राप्तये वैकल्यं दरीदृश्यते तदनुरूपञ्च प्रयत्नमपि ते जनाः आदर्शभूतविद्यार्थिनः भवन्ति।

पुरा महर्षिभिः समग्रं मानवजीवनं चतुर्धाविभक्तम्। जीवनं शतवर्षात्मकं स्वीकृत्य प्रथमं पञ्चविंशतिवर्षात्मकं जीवनकालः ब्रह्मचर्यः कथ्यते। इदमेव विद्याध्ययनस्य सर्वोत्तमः समयः कथ्यते। बालकाः ~~अस्मिन्~~ अस्मिन समये स्वगृहेभ्यः गुरुगृहं विद्याध्ययनाय सद्गुणार्जनाय च जग्मुः। तेषु सदाचारिणः ~~गुरु~~ गुरवः निस्स्वार्थभावनया स्वान् शिष्यान् अपाठयन्। शिष्याः अपि सर्वदा गुरुणाम् आदेशानां सर्वथा पालनं चक्रुः। आदर्शभूतछात्रस्य महर्षिभिः पञ्चलक्षणानि प्रतिपादितानि :—

काकचेष्टा बकध्यानं श्वाननिद्रा तथैव च।
अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणः।

सर्वेषां छात्राणां कृते आदर्शछात्ररूपे प्रतिष्ठां प्राप्तुम् उपरिलिखितानि पञ्चलक्षणानि अवश्यमेव सेवितव्यानि। यथा काकः सर्वदा चेष्टते यत् कुत्र भोजनं मिलिष्यति कुत्र कथं च सुरक्षां प्राप्स्यति तथैव विद्यार्थिभिः

सर्वदा करणीयं प्रयत्नीयं च। यथा बकस्य ध्यानं सर्वदा स्वलक्ष्यरूपमकरादिषु जन्तुषु केन्द्रितमस्ति तथैव विद्यार्थिनोऽपि स्वः उद्देश्यरूपां विद्याम् अधिगन्तुं प्रयत्नं कुर्युः। श्वाननिद्रावत् विद्यार्थिजनैः अल्पकालावधिं यावत् शयनं करणीयम्। अल्पाहारं तु पठनाय अत्यावश्यकम्। गृहस्य त्यागं तु विद्यार्थिनां कृते परमावश्यकं प्रतिभाति। साम्प्रतिकाः विद्यार्थिनः पूर्णरूपेण गृहत्यागं कर्तुं न शक्नुवन्ति। परं ते उपरि निर्दिष्टानि अन्यानि चत्वारि लक्षणानि पालयितुं समर्थाः भवितुं शक्नुवन्ति। उक्तानि सर्वाणि लक्षणानि तु तेषाम् एकान्तविद्यार्जनप्रवर्तकानि एव सन्ति।

प्राचीनैः ग्रन्थैः इदं प्रतिपादितं यत् "अध्ययनं परमं तपः"। वस्तुतः विद्यार्जनं कठिनतमं तपः वर्तते। विद्यार्थिजीवने धैर्यस्य परीक्षा भवति। ये जनाः धैर्यवन्तः सन्ति ते एव स्वजीवनपरीक्षायां सफलतायाः पात्राणि भवन्ति। अत एव विद्यार्थिनां कृतेऽपि विद्याध्ययनाय धैर्यस्य महती आवश्यकता वर्तते।

विद्यार्थिजीवनं तु मानवजीवनस्य निर्माणाय मानवेभ्यः अवसरं प्रददाति। अस्मिन्नेव काले सर्वविधानां मानसिक-बौद्धिकशक्तीनां विकासाय अस्मिन् जीवने पर्याप्तम् अवसरं भवति। अध्ययनकाले अध्येतृभिः स्वचरित्रनिर्माणाय अपि प्रयत्नीयम्। सच्चरित्रयुक्ताः

Classmate
Date
Page

विद्यार्थिनः एव भविष्यत्काले सर्वकारस्य व्यवस्थायाम् उच्चपदं प्राप्नुवन्ति। अतः विद्यार्थिभिः अवश्यमेव दत्तचित्तयुक्ताः भूत्वा अध्ययने संलग्नं भवितव्यम् इति।

---